अध्याय: 2

# आरम्भिकमानवस्य अन्वेषणम् एव पर्याप्तं भाति

**तुषारस्य रेलयात्रा**



तुषारः स्वस्य कस्यचित् सम्बन्धिनः विवाहस्य अवसरे देहलीतः चेन्नईनगरं प्रति गच्छन् आसीत् । रेलयाने सः वातायनपक्षीयं स्थानं प्राप्तवान्, यतः सः बहिष्ठं दृश्यं दर्शने व्यस्तः जात । तीव्रधावतः यानात् सः दृष्टवान् यत् वृक्षाः, पादपाः, क्षेत्राणि गृहाणि च तीव्रगत्या पृष्ठभागं प्रति गच्छन्ति स्म । तदा तस्य पितृव्यः तस्य स्कन्धे हस्तं स्थापयन् उक्तवान्, "जानाति भवान् यत् मात्रं सार्धैकशतवर्षेभ्यः प्राक् जनाः रेलयात्रां कर्तुम् आरब्धवन्तः ? बसयानं तु एतस्य केषाञ्चित् दशकानाम् अनन्तरं आगतम्" । तुषारः चिन्तितवान् यत् यदा जनानां समीपे गमनागमनाय द्रुतगामानि यानानि न आसन् तदा ते कथं यात्रां कुर्वन्ति स्म । किं ते स्वकीयं सम्पूर्णं जीवनम् एकस्मिन् स्थाने एव यापयन्ति स्म? नैव, इत्थं न आसीत्

## आरम्भिक-मानवः – ------------------------- ?

वयं तेषां जनानां विषये जानीमः, ये अस्मिन् उपमहाद्वीपे विंशतिलक्षवर्षेभ्यः प्राक् निवसन्ति स्म । अद्य वयं तान् आखेटक-खाद्य-सङ्ग्राहकाः इति रूपेण जानीमः । भोजनस्य व्यवस्थाकरणस्य विध्यनुसारं ते आखेटकः खाद्यसङ्ग्राहकः च इति नामद्वयेन अभिज्ञायन्ते स्म । सामान्यतः ते भोक्तुं वन्यपशूनाम् आखेटं कुर्वन्ति स्म, मत्स्यान् चटकान् च निगृह्णन्ति स्म, फलानि मूलानि बीजानि पादपान् पर्णानि अण्डानि च एकत्रीकुर्वन्ति स्म । अस्माकम् उपमहाद्वीपसदृशेषु उष्णदेशेषु वृक्षाणां पादपानां च असङ्ख्यप्रजातयः च लभन्ते । अतः वृक्षेभ्यः पादपेभ्यः च प्राप्यमानाः खाद्यपदार्थाः भोजनस्य अत्यन्त-महत्त्वपूर्णानि स्रोतांसि आसन् ।

एतस्य सर्वस्य सम्पादनं सर्वथा सरलं नासीत् । एतादृशाः बहवः पशवः सन्ति ये अस्मत्तः अपि तीव्रतया धावनं कर्तुं शक्नुवन्ति अपि च बहवः पशवः अस्मत्तः अपि शक्तिशालिनः भवन्ति । पशूनाम् आखेटाय चटक-मत्स्यादीनां ग्रहणाय जागरूकता अत्यावश्यकी भवति । यदा वयं पादपेभ्यः वृक्षेभ्यः च भोज्यस्य प्रबन्धं कुर्मः तदा एतत् ज्ञानम् आवश्यकं भवति यत् के पादपाः वृक्षाः वा भक्ष्याः सन्ति यतो हि अनेकविधाः पादपाः विषयुक्ताः अपि भवन्ति । सहैव फलानां परिपक्वकालस्य अपि ज्ञानम् आवश्यकं भवति ।

एतादृशे समुदाये वसतां बालानां ज्ञानस्य गुणानां च वर्णनं करोतु । किं भवति एतादृशाः गुणाः ज्ञानं च अस्ति ?

एतेषाम् आखेटक-खाद्य-सङ्ग्राहक-समुदायस्य जनानाम् स्थानात् स्थानान्तरं भ्रमणस्य मूले न्यूनातिन्यूनं चत्वारि कारणानि भवितुं शक्नुवन्ति ।

प्रथमं कारणम् इदम् अस्ति यत् यदि ते एकस्मिन् स्थाने अधिकं कालं यावत् निवसन्ति स्म तर्हि तत्र समीपस्थान् वृक्षान् पादपान् पशून् च खादित्वा समापयन्ति स्म । अतः भोजनान्वेषणे तैः अन्यस्थानानि गन्तव्यानि भवन्ति स्म ।

अपरं कारणम् इदम् अपि आसीत् यत् पशवः अपि स्वभक्ष्यस्य अन्वेषणे यथा हरिणः अथवा मृगाः वा एकस्मात् स्थानात् पृथक्स्थानं प्रति गच्छन्ति स्म । अतः एतेषां पशूनाम् आखेटकाः अपि तान् अनुगच्छन्ति स्म ।

तृतीयं कारणम् इदम् अस्ति यत् वृक्षेषु पादपेषु च फलानि पुष्पाणि च पृथक् पृथक् ऋतौ आयान्ति, अतः जनाः तेषाम् अन्वेषणे उपयुक्तायाः ऋतोः अनुसारम् अन्येषु क्षेत्रेषु भ्रमन्तः स्युः ।

अपि च चतुर्थं कारणम् इदम् अस्ति यत् जलं विना कस्यापि प्राणिनः पादपस्य वृक्षस्य च जीवनं न सम्भवति जलं च क्षुद्रतडागेभ्यः तडागेभ्यः नदीभ्यः च लभते । यद्यपि कासाञ्चित् नदीनां केषाञ्चित् च तडागानां जलं कदापि न शुष्यति, केषुचित् तडागेषु कासुचित् नदीषु च जलं वर्षाकाले एव उपलभ्यते । अतः एतादृशीनां नदीनां एतादृशानां च तडागानां तटेषु वसन्तः जनाः शुष्कताकाले जलस्य अन्वेषणार्थं इतस्ततः गच्छन्ति स्म । एतदतिरिच्य जनाः स्वज्ञातिभिः मित्रैः च सह मेलितुं गच्छन्ति स्म । अत्र एतत् ध्यातव्यं यत् एते सर्वे जनाः पदातियात्रां कुर्वन्ति स्म ।

भवान् विद्यालयं कथं गच्छति ?

गृहात् विद्यालयं प्रति गन्तुं भवतः कियान् कालः लगति ?

यदि भवान् द्विचक्रिकया बसयानेन वा विद्यालयं गच्छति तर्हि भवतः कियान् कालः लगिष्यति ?

### आरम्भिक-मानवस्य विषये **ज्ञानं** कथं प्राप्यते ?

पुरातत्त्वविदः कानिचन एतादृशानि वस्तूनि प्राप्तवन्तः सन्ति येषां निर्माणम् उपयोगः च आखेटक-खाद्य-सङ्ग्राहकाः कुर्वन्ति स्म । इदं भवितुं शक्नोति यत् जनाः स्वस्य कृते पाषाणमयानि काष्ठमयानि अस्थिमयानि च शस्त्राणि उपकरणानि वा **रचितवन्तः** स्युः । एतेषु पाषाणमयानि उपकरणानि अद्यापि उपलभ्यन्ते ।

अत्र पाषाणमयोपकरणानां केचन उपयोगाः दर्शिताः सन्ति । एतादृशानां कार्याणां काञ्चित् सूचीं रचयतु येषु एतादृशानि उपकरणानि कार्ये आनीयन्ते । ज्ञापयन्तु यत्



पाषाणमयानि उपकरणानि

क) एतानि पाषाणमयानि प्राचीनानि उपकरणानि सन्ति।

ख) एतानि सहस्राधिक-वर्षाणां पश्चात् निर्मितानि सन्ति।

ग) एतानि ततोऽपि पश्चात्काले निर्मितानि सन्ति।

घ) एतानि प्रायः दशसहस्रवर्षेभ्यः पूर्वं निर्मितानि आसन्।

ङ) अपि च एताः गुटिका इति (प्राकृतिक-ग्रावाः) सन्ति।

एतेषु कानि कानि कार्याणि सामान्यपाषाणैः कर्तुं शक्यन्ते । कारणसहितम् उत्तरं यच्छन्तु।

एतेषु केषाञ्चित् उपकरणानाम् उपयोगः फलानि पुष्पाणि अस्थीनि मांसानि च कर्तयितुं वृक्षत्वचः पशुत्वचः च निःसारयितुं क्रियते स्म। कैश्चित् पाषाणमयोपकरणैः सह अस्थ्नां काष्ठानां च मुष्टकान् योजयित्वा कुन्ताः शराः उपकरणानि च निर्मीयन्ते स्म। कैश्चित् उपकरणैः काष्ठानि कर्त्यन्ते स्म। काष्ठानां प्रयोगः इन्धनेन सह कुटीरान् उपकरणानि च रचयितुम् अपि क्रियते स्म।



पाषाणमयानाम् उपकरणानाम् उपयोगः

वामतः – मनुष्यस्य भक्ष्य-मूलानि खनितुं एतेषां प्रयोगः क्रियते स्म, अपि च दक्षिणतः – पशूनां चर्मणः निर्मितवस्त्राणि सीवितुं क्रियते स्म।

## वासस्थानकस्य निर्धारीकरणम्

द्वितीयं मानचित्रं पश्यतु । रक्तत्रिकोणस्थलानि तानि पुरातत्त्वस्थलानि सन्ति यत्र आखेटक-खाद्य-सङ्ग्राहकाः

आसन् इति प्रमाणी-भवति। एतानि अतिरिच्य अपि बहुषु स्थानेषु आखेटक-खाद्य-सङ्ग्राहकाः निवसन्ति स्म। मानचित्रे केवलं कानिचन चितस्थानानि एव चिह्नितानि सन्ति। कानिचित् पुरास्थलानि नदीनां क्षुद्रतडागानां च तटेषु प्राप्तानि सन्ति।

यतो हि पाषाणमयानि उपकरणानि बहूनि महत्त्वपूर्णानि आसन् अतः जनाः एतादृशं स्थानम् अन्वेषयन्ति स्म यत् समीचीनाः पाषाणाः लभेरन्। यत्र जनाः पाषाणमयानि उपकरणानि निर्मान्ति स्म तानि स्थलानि उद्योगस्थलानि इति उच्यन्ते स्म।



भीम-बेटका (आधुनिक-मध्यप्रदेशः) आवासीय-पुरास्थलानि तानि उच्यन्ते यत्र जनाः निवसन्ति स्म । एतेषु गुहाकन्दरावत् तानि स्थलानि भवन्ति यानि अत्र दर्शितानि सन्ति । जनाः एतेषु गुहासु एतदर्थं निवसन्ति स्म यतो हि ते अत्र प्रचण्डवायोः वर्षाभ्यः आतपात् च रक्षिताः भवन्ति स्म । एतादृश्यः गुहाः विंध्यदक्कनयोः पर्वतीयक्षेत्रेषु लभन्ते स्म याः नर्मदोपत्यकायाः समीपे सन्ति । किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् वसितुं जनाः एतादृशं स्थानं किमर्थं चितवन्तः स्युः ?

वयम् एतेषाम् उद्योगस्थलानां विषये कथं जानीमः ? सामान्यतया वयम् एतादृशेषु स्थलेषु पाषाणानां महतः खण्डान् लभामहे, अपि च एतादृशानि उपकरणानि अपि लभामहे यानि जनाः एतेषु स्थलेषु त्यक्तवन्तः स्युः यतो हि समीचीनतया निर्मितानि न भवेयुः । अपि च उपकरणानां निर्माणस्य पश्चात् पाषाणानां लघुखण्डाः अपि एतेषु स्थस्थलेषु लभन्ते । कदाचित् जनाः एतेषु स्थलेषु किंचित् अधिकं कालं यावत् वसन्ति स्म । एतादृशानि स्थलानि आवासीयस्थलानि उद्योगस्थलानि वा उच्यन्ते ।



यदि भवता स्वनिवासस्थानस्य विषये वक्तव्यं स्यात् तर्हि भवान् एतेषु किं नाम चेष्यति ?

(क) आवासः

(ख) उद्योग-स्थलम्

(ग) आवासः उद्योगस्थलं च

(घ) अन्यत्

## पुरास्थलम्

**पुरास्थलं** तत् स्थानम् उच्यते यत्र उपकरण-पात्र-भवनादिवस्तूनाम् अवशेषाः लभन्ते । एतादृशानां वस्तूनाम् उपयोगं ते स्वकार्यार्थं कृतवन्तः आसन् अपि च पश्चात् ते तानि तत्र एव अत्यजन् । एतानि भूमौ, अन्तः कदाचित् समुद्रस्य नद्याः तले च अपि प्राप्यन्ते । एतेषां पुरास्थलनां विषये भवान् अग्रिमे अध्याये पठिष्यति ।

### पाषाणमयोपकरणानां निर्माणम्

पाषाणमयानि उपकरणानि प्रायः द्वाभ्याम् उपायाभ्यां रच्यन्ते स्म ।

1. पाषाणेन पाषाणस्य विघटनम् । अर्थात् येन पाषाणेन कस्यचित् उपकरणस्य निर्माणं करणीयं भवति स्म तत् एकस्मिन् हस्ते स्वीक्रियते स्म अपि च अपरेण हस्तेन कस्यचित् पाषाणस्य प्रयोगः अयोघ्नरूपेण क्रियते स्म । इत्थम् आघातकारकेन पाषाणेन अपरस्मिन् पाषाणे तावत्पर्यन्तं शल्क इति निष्कास्यन्ते स्म यावत्पर्यन्तं वाञ्छिताकारवत् उपकरणं निर्मितं न स्यात् ।



पाषाणोपकरणानि कथं निर्मीयन्ते स्म । एतेषां निर्माणाय प्रयुक्तयोः उपाययोः एकः अत्र दर्शितः अस्ति । ज्ञापयतु एषः कः उपायः अस्ति ।

2. अपरः उपायः “दबाव-शल्क-अभियान्त्रिकी” इति उच्यते । एतस्यां क्रोडः कस्मिंश्चित् स्थिरतले स्थाप्यते अपि च अस्मिन् क्रोडे अस्थि पाषाणं च स्थापयित्वा तस्मिन् अयोघ्नाकारकस्य पाषाणेन शल्काः कृष्यन्ते विलिख्यन्ते वा । यतः अभीष्टोपकरणानि निर्मीयन्ते ।

### 3. अग्नेः आविष्कारः

1. द्वितीये मानचित्रे कुरनूलगुहाम् अन्वेषयन्तु (पृष्ठम्- १४) अत्र भस्मावशेषाः अलभन्त । एतस्य अभिप्रायः अयम् अस्ति यत् आरम्भिकजनाः अग्नेः प्रज्वालनं ज्ञातवन्तः आसन् । अग्नेः प्रयोगः अनेकेषां कार्याणां कृते अभवत् स्यात् यथा प्रकाशाय मांसभूर्जनाय हिंसकपशून् पलाययितुं च इत्यादीनां कृते कुर्वन्ति स्म ।

### अद्य वयम् अग्नेः उपयोगं किमर्थं कुर्मः?

### परिवर्तमानः जलवायुः

प्रायः १२००० सहस्रं वर्षेभ्यः प्राक् संसारस्य जलवाय्वोः महान्ति परिवर्तनानि आगतानि अपि च घर्मस्य वर्धनम् प्रारब्धम् । परिणामतः बहुषु क्षेत्रेषु घासयुक्त-क्षेत्राणि विकसितानि । एतस्मात् हिरण-द्वादशशृङ्गी-अवी-अजा-गोसदृशानां पशूनां सङ्ख्या वर्धितुम् आरब्धा ये घासं खादित्वा जीवितुं शक्नुवन्ति । ये जनाः एतेषां पशूनाम् आखेटं कुर्वन्ति स्म ते अपि तान् अन्वगच्छन् अपि च एते पशवः किं खादन्ति एवञ्च एतेषां प्रजननं कस्मिन् काले भवति एवंविधं ज्ञानं ते प्राप्तवन्तः । एतत् शक्यते यत् तदानीं जनाः स्वावश्यकतानाम् अनुसारं पशूनां पालनस्य विषये चिन्तितुम् आरब्धवन्तः स्युः । अपि च एतस्मिन् काले मत्स्याः अपि भोजनस्य

महत्त्वपूर्णरूपेण अङ्गभूताः जाताः । एतस्मिन् एव काले उपमहाद्वीपस्य पृथक् पृथक् क्षेत्रेषु गोधूम-यव-धान्यसदृशानि कर्तृक्रियासम्बन्धः अपि प्राकृतिकरूपेण उत्पादितानि। प्रायः महिलाः पुरुषाः बालाः च एतानि अन्नानि भोजनस्य रूपेण एकत्रीकर्तुम् आरब्धवन्तः स्युः । अपि च ते इदम् अपि शिक्षितुम् आरब्धवन्तः स्युः यत् अन्नानि कुत्र उत्पाद्यन्ते स्म अपि च कदा पक्वा भक्ष्यानि भवन्ति स्म । इत्थं कारं कारं जनाः एतानि अन्नानि स्वयम् उत्पादयितुम् आरब्धवन्तः स्युः ।



किञ्चित् शैलचित्रम्। अस्य चित्रस्य विषये ज्ञापयतु ।

## शैलचित्रकला : एतया वयं किं ज्ञातुं शक्नुमः ?

यासु गुहासु जनाः निवसन्ति स्म, तासु कासाञ्चित् भित्तीनां उपरि चित्राणि लब्धानि सन्ति। एतेषु कानिचन सुन्दरोदाहरणानि मध्यप्रदेशस्य दक्षिणोत्तरप्रदेशस्य च गुहाभ्यः प्राप्तानि चित्राणि सन्ति। एतेषु वन्यप्राणिनां महत्या कुशलतया सजीवचित्रणं कृतम् अस्ति।

**नाम-तिथयः च**

वयं यस्य कालस्य विषये पठामः, पुरातत्त्वविदः तस्य सुदीर्घाणि पृथक्-पृथक्-नामानि स्थापितवन्तः सन्ति । आरम्भिककालं ते पुरापाषाणकालं कथयन्ति । अयं शब्दः द्वयोः शब्दयोः निर्मितः अस्ति पुरा अर्थात् प्राचीनं पाषाणः अर्थात् प्रस्तर इति । इदं नाम पुरास्थलेभ्यः प्राप्तपाषाणस्य उपकरणानां महत्त्वं ज्ञापयति । पुरापाषाणकालः विंशतिलक्षवर्षेभ्यः प्राक् १२०००वर्षेभ्यः प्राक्तनः कालः मन्यते । अयं कालः अपि त्रिषु भागेषु विभक्तः अस्ति- आरम्भिक-कालः, मध्यकालः, उत्तरपुरापाषाणयुगं च । मानवेतिहासस्य प्रायः प्रतिशतं ९९ कथाः एतस्मिन् कालावधौ एव घटिताः ।

यस्मिन् काले वयं पर्यावरणीय-परिवर्तनानि पश्यामः तत् 'मेसोलिथ' अर्थात् मध्यपाषाणयुगम् इति उच्यते । एतस्य समयः प्रायः १२००० वर्षेभ्यः पूर्वम् आरभ्य १०००० वर्षेभ्यः पूर्वं यावत् मन्यते । एतस्य कालस्य पाषाणमयानि उपकरणानि सामान्यतः बहूनि लघूनि भवन्ति स्म । तानि 'माइक्रोलिथ' अर्थात् लघुपाषाणाः उच्यन्ते । प्रायः एतेषु उपकरणेषु अस्थ्नां काष्ठानां च हस्तकलाः अपि च लवित्रम् इति तथा च शस्त्रीसदृशानि उपकरणानि लभ्यन्ते स्म । सार्धम् एव पुरापाषाण-युगीयानि उपकरणानि अपि एतस्मिन् काले एव निर्मीयन्ते स्म ।

त्रयोदशपृष्ठे निर्मितचित्रं पश्यतु । एतस्मिन् कालावधौ निर्मितोपकरणेषु भवान् किमपि परिवर्तनं पश्यति?

अग्रिम-युगस्य प्रारम्भः प्रायः १०,०००वर्षेभ्यः प्राक् भवति । एतत् नवपाषाणयुगम् इति उच्यते । अग्रिमे अध्याये भवान् नवपाषाणयुगस्य विषये पठिष्यति।

*नवपाषाणस्य कोऽर्थः स्यात्?*

अस्माभिः केषाञ्चित् स्थानानां नामानि प्रदत्तानि सन्ति। अग्रिमेषु अध्यायेषु भवन्तः एतादृशानि बहूनि नामानि प्राप्स्यन्ति। प्रायः वयं पुरातनस्थानेभ्यः तेषां नाम्नां प्रयोगं कुर्मः, यानि अद्य प्रचलितानि सन्ति, यतो हि वयं न जानीमः यत तस्मिन काले एतेषां नामानि कानि स्युः ।

## कः किं करोति स्म ?

अस्माभिः पठितं यत् आरम्भिकजनाः आखेटं फलमूलस्य च सङ्ग्रहणं कुर्वन्ति स्म। ते पाषाणमयानि उपकरणानि गुहासु च चित्राणि रचयन्ति स्म। किं वयम् एतादृशानि साक्ष्याणि प्राप्नुमः येभ्यः ज्ञायते यत् महिलाः आखेटं कुर्वन्ति स्म अथवा पुरुषाः उपकरणानि निर्मान्ति स्म अथवा महिलाः चित्रकलां कुर्वन्ति स्म अपि च पुरुषाः फलानि मूलानि च सङ्गृह्णन्ति स्म ? वास्तविकतायाम् अस्माभिः एतत् न ज्ञायते। परन्तु द्वे तथ्ये भवितुम् अर्हतः महिलाः पुरुषाः च मिलित्वा बहूनि कार्याणि कृतवन्तः स्युः। इदम् अपि सम्भाव्यते यत् कानिचन एतादृशानि कार्याणि महिलाः एव कानिचन कार्याणि च केवलं पुरुषाः एव कुर्वन्ति स्म। एतदतिरिच्य उपमहाद्वीपस्य भिन्नेषु भिन्नेषु क्षेत्रेषु भिन्नाः भिन्नाः परम्पराः अपि स्युः।

### भारते उष्ट्रपक्षी !

भारते पुरापाषाणकालीनाः उष्ट्रपक्षिणः भवन्ति स्म । महाराष्ट्रस्य पटने इति पुरास्थालात् उष्ट्रपक्षिणः अण्डावशेषाः अलभन्त । एतेषां केषुचित् त्वक्षु चित्राङ्कनम् अपि लभते । एतैः अण्डैः मनके इत्यपि निर्मीयन्ते स्म ।

एतेषां मनके इत्येतेषां प्रयोगः किमर्थं कृतं स्यात्?

अद्य वयं उष्ट्रपक्षिणः कुत्र प्राप्नुमः ?

## हुँस्गी इत्यस्याः सूक्ष्मपरीक्षणम्

द्वितीये मानचित्रे हुँस्गी इत्येताम् अन्वेषयन्तु (पृष्ठम्-१४)। अत्र पुरापाषाणयुगस्य अनेकानि पुरास्थलानि प्राप्तानि आसन्। केभ्यश्चित् पुरास्थलेभ्यः पृथक्-पृथक्-कार्येषु प्रयुक्तानि अनेकविधानि उपकरणानि प्राप्तानि आसन्। एते सम्भवतः आवासाः उद्योगस्थलानि वा स्युः। केषुचित् पुरास्थलेषु अपि उपकरणनिर्माणस्य प्रमाणानि अलभन्तः। एतेषु कानिचन पुरास्थलानि प्रपातानां समीपे आसन्। अधिकांशतः उपकरणानि चूनापाषाणैः निर्मीयन्ते स्म।

किं भवान् अपरप्रकारकस्य पुरास्थलानां नामानि ज्ञापयितुं शक्नोति ?

### अन्यत्र

स्वमानचित्रे फ्रांसम् अन्वेषयतु । इदं चित्रं फ्रांसस्य कस्यचित् गुहायाः अस्ति । एतस्य पुरास्थलस्य अन्वेषणं प्रायः शतं वर्षाणि पूर्वं चतुर्भिः विद्यालयच्छात्रैः कृतम् आसीत् । एतादृशानि चित्राणि प्रायः विंशतिसहस्रात् वर्षेभ्यः प्राक् आरभ्य दशसहस्रवर्षाणां मध्ये निर्मितानि स्युः। एतेषु बहूनां पशूनां चित्राणि सन्ति । एतेषु वन्याश्व-गो-महिषी-गण्डक-रेनडियर-द्वादशश्रृङ्गि-सूकरादयः च गभीरद्युतिपूर्णैः वर्णैः चित्रिताः सन्ति । एतानि वर्णानि लौहायस्कैः चारकोलसदृशैः खनिजपदार्थैः च निर्मीयन्ते स्म । इदं सम्भाव्यते यत् एतानि चित्राणि उत्सवकाले निर्मीयन्ते स्म अथवा पुनः एतानि आखेटकैः आखेटात् प्राक् केषाञ्चित् अनुष्ठानानां कृते निर्मितानि स्युः।

किं भवान् एतेषां निर्माणस्य किञ्चित् कारणं ज्ञापयितुं शक्नोति ?



## कल्पनां कुर्वन्तु

भवान् अद्यारभ्य १२०००वर्षेभ्यः पूर्वं पाषाणमय-गुहायां निवसति । १५पृष्ठे पश्यतु। भवतः मातुलः गुहायाः कस्याञ्चित् अन्तःभितौ चित्राणि रचयति अपि च भवान् तस्य साहाय्यं कर्तुम् इच्छति। भवान् वर्णं रचयिष्यति रेखाः आकर्क्ष्यति अथवा पुनः तासु वर्णं पूरयिष्यति ? भवतः मातुलः भवन्तं काः काः कथाः श्रावयिष्यति ?

उपयोगि-शब्दः
आखेटक-खाद्य-सङ्ग्राहकः, पुरास्थलम्, उद्योगस्थलम्, आवासीय-स्थलम्, पुरापाषाणः,मध्यपाषणः,लघपाषाणः

### आगच्छन्तु स्मरणं कुर्मः



१. एतानि वाक्यानि पूरयन्तु।

क) आखेटक-खाद्य-सङ्ग्राहकाः गुहासु एतदर्थं निवसन्ति स्म यतो हि ___ ।

ख) घासस्य क्षेत्राणां विकासः _______________वर्षेभ्यः पूर्वम् अभवत्।

ग) आरम्भिकजनाः गुहानां__________चित्राणि विलिखितवन्तः।

घ) हुँस्गीमध्ये ______उपकरणानि निर्मीयन्ते स्म।

२. उपमहाद्वीपस्य आधुनिक-राजनैतिक-मानचित्रं १३६तमे पृष्ठे पश्यतु । तानि राज्यानि अन्वेषयतु यत्र भीमबेटका-हुँस्गी-कूरनूलाः च स्थिताः सन्ति। किं तुषारस्य रेलयानम् एतेभ्यः स्थानेभ्यः भूत्वा गतं स्यात् ?

काञ्चन-महत्वपूर्ण-तिथयः

- मध्यपाषाण-युगम् (१२०००-१०००० वर्षेभ्यः पूर्वम्)
- नवपाषाणयुगस्य आरम्भः (१०,००० वर्षेभ्यः पूर्वम्)

## आगच्छन्तु चर्चां कुर्मः



३. आखेटक-खाद्य-सङ्ग्राहकाः एकस्मात् स्थानात् अपरस्मिन् स्थाने किमर्थं भ्रमन्ति स्म ? तेषां यात्रायाः कारणम् अपि च वर्तमानकालस्य अस्माकं यात्रायाः कारणेषु काः समानताः सन्ति अपि च काः विभिन्नताः सन्ति ?

४. अद्य भवान् फलानि कर्तयितुं कस्य उपकरणस्य प्रयोगं करिष्यति? तत् उपकरणं केन वस्तुना निर्मितं स्यात् ?

५. आखेटक-खाद्य-सङ्ग्राहकाः अग्नेः उपयोगं केषां केषां वस्तूनां कृते कुर्वन्ति स्म? किं भवान् अद्य अग्नेः उपयोगं एतेषु कस्यचित् वस्तुनः कृते करिष्यति !

## आगच्छन्तु कृत्वा पश्यामः



६. स्वपुस्तिकायाः पृष्ठे एकां पक्तिं निर्माय एतस्याः कोष्ठकद्वयं रचयतु। वामभागस्य कोष्ठके तेषां खाद्यपदार्थानां सूचीं रचयतु यान् आखेटक-खाद्य-सङ्ग्राहकाः खादन्ति स्म (एकादशपृष्ठे पश्यतु) अपि च दक्षिणस्थे कोष्ठके भवान् यान् पदार्थान् खादति तेषु केषाञ्चित् नामानि लिखतु । किं भवान् एतयोः द्वयोः कामपि समानताम् अथवा भेदं पश्यति ?

७. यदि भवतः पार्श्वे काचित् गुटिका स्यात् (प्राकृतिक-पाषाण-खण्डः यथा त्रयोदश पृष्ठे दर्शितः अस्ति) तर्हि भवान् तस्य प्रयोगः कस्य कार्यस्य कृते करिष्यति ?

८. एतादृशं कार्यद्वयं लिखतु ये अद्य महिलाः पुरुषाः च इति उभौ कुर्वतः । एतादृशं कार्यद्वयं ज्ञापयतु ये केवलं महिलाः एव अपि च द्वे कार्ये ये केवलं पुरुषाः एव कुर्वन्ति। स्वसूच्याः स्वस्य द्वयोः मित्रयोः सूच्या सह तोलनां करोतु। किं भवान् एतयोः द्वयोः काञ्चित् समानताम् अथवा भेदं पश्यति ?

इति द्वितीयोऽध्यायः